PAPER - 2

# MT

2018 .... .... 1100

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - II**

**Time : 2 Hours** **(Pages 7)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

१) अन्येद्युः यात्री ............ गङ्गानदीम् अगच्छत् । (साशङ्कमनसा / निशङ्कमनसा)

२) सूर्यकिरणैः जलस्य ............ भवति । (क्षालनम् / बाष्पम्)

(ii) कः कं वदति ? १

अहं तु जीवनदाता ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

सुर्यकिरणैः नदीजलस्य क्षालनं भवति ।

अन्येद्युः साशङ्कमनाः स गङ्गातीरं गत्वा गङ्गानदीं पृष्टवान्, हे गङ्गादेवि, अहर्निशं जनानां पापक्षालनं करोषि। तेन भवत्याः जलं निश्चितं पापमयं वर्तते । तर्हि भवती अस्य पापमयजलस्य किं करोतीति ? तन्निशम्य गङ्गा उक्तवती, रे यात्रिन् यदाऽहं सागरं मिलामि तदा सर्वमेतत्पापमयं जलं तस्मिन्नेव उत्सृजामि ।अनन्तरं तस्य किं भवतीति न जानेऽहमिति तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर,सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं गृह्णामीति सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति । बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति । तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति ? मेघः भणितवान्, न किमपि करोमि। अहं तु जीवनदाता । जीवनं स्वकर्माधिष्ठितम् । अतः यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामीति। एतन्निशम्य यात्री मनस्यकरोत् ।

**२. स्वमतप्रकटनम् ।** २

अपि नदीस्नानेन पापमुक्तिः भवति वा न इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

मधुरायाः माता ग्राहकमञ्चं गन्तुम् इच्छति यतः .......... ।

(ग्राहकमञ्चः समीपं वर्तते । / शाकविक्रेता विधिविरुद्धम् आचरति ।)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

ग्राहकमञ्चः कदा स्थापितः ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

ग्राहकहिताय ग्राहकसुखाय विक्रेतृमञ्चः स्थापितः ।

| | |
|---|---|
| मधुरा | - अम्ब,नैष सम्यक् तोलयति । तोलनार्थं सम्यक् परिमाणमपि न योजयति । परिमाणस्थाने पाषाणखण्डं योजयति । |
| माता | - मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम् । तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम्? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि । |
| मधुरा | - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः । |
| माता | - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (1974) संवत्सरे स्थापिता एषा संस्था। 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः शाकविक्रेता | - यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय । |
| माता | - युक्तमुक्तं भवता । |
| प्रथमः शाकविक्रेता | - (तोलयित्वा ददाति) गृह्णातु भवती । क्षम्यताम् । |
| माता | - कथं प्लास्टिकस्यूतं ददासि ? वस्त्रस्यूतः मत्समीपे वर्तते । |
| मधुरा | - पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानामुपयोगः न करणीयः । |

**२. स्तम्भपूरणम् ।** २

| वैधम् | अवैधम् |
|---|---|
| | |

(त्रुटिता तुला, अनुज्ञापत्रम्, प्लास्टिकस्यूतः, ISI परिमाणानि)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

a) अरण्यम्, काननम्, शस्त्रम्, वनम्

b) विहगः, कातरः, अधीरः, कापुरुषः

(ii) विशेषण - विशेष्य - अन्वितिः । (मेलनं कुरुत ।) १

| | |
|---|---|
| १) करुणार्द्रहृदयः | जन्तवः । |
| २) अपरस्य | अर्जुनः । |
| ३) पर्णबद्धाः | वृक्षस्य । |
| ४) क्षुद्राः | निलयाः । |

(iii) गद्यांशात् द्वे पूर्वकालवाचक - ल्यबन्त - अव्यये चित्वा लिखत । १

एकदा श्रेष्ठो धनुर्धारी अर्जुनः विहारार्थं निबिडारण्यं जगाम । जनसमाकुलान्नगराद् दूरं गत्वा सः मनःशान्तिमनुभवितुमैच्छत् वने विहरन् चण्डातपेन तप्तः सः वीजनार्थं वृक्षशाखां छेत्तुं प्रारेभे । तदैव कोऽपि सूर्यखगः तत्रागत्य तस्य हस्ते उपविश्य तं प्रार्थयामास -''हे धनुर्धर, न छेत्तव्या शाखासौ यतः शाखायामस्यां निबद्धे नीडे मम शावकाः सुप्ताः। महता कष्टेन निर्मितमेतन्नीडं मया । मामनुग्रहीतुमर्हति भवान् ।'' तस्य वचनं श्रुत्वा करुणार्द्रहृदयः अर्जुनः तमुवाच, ''मा कातरो भव । न पीडयामि त्वां तव शावकान् वा ।'' ततः अपरस्य वृक्षस्य शाखां छेत्तुं प्रवृत्तस्य अर्जुनस्य हस्तस्योपरि काञ्चन पिपीलिकाः वृक्षादपतन् । ता अपि अर्जुनं प्रार्थयन्त, ''हे स्वामिन्, एतासु शाखासु पर्णबद्धाः कन्दुकाकाराः अस्माकं निलयाः । तदाश्रिताः अस्माकं शावकाः अस्माकं राज्ञी सेवकाश्च । किं बहुना, शाखाच्छेदनेन वयं सर्वे निराश्रयाः भवेम। अस्मान् उपकरोतु भवान्। आपत्काले त्वां ध्रुवं साहाय्यं करिष्यामः पिपीलिकानामभ्यर्थनामाकर्ण्य अर्जुनस्तस्मात् स्थानात् प्रातिष्ठताचिन्तयच्च ''क्षुद्राः जन्तवः एते सूर्यखगाः पिपीलिकाः । कथं मम साहाय्यकारिणः भविष्यन्ति । अहं तु शक्तिमान्, शस्त्रधारी, निपुणयोद्धा च ।''

**२. पृथक्करणम् ।** २

यथाक्रमं घटनाः लिखत ।

(i) सूर्यखगस्य निवेदनम् ।

(ii) अर्जुनस्य वनगमनम् ।

(iii) वृक्षशाखायाः छेदनम् ।

(iv) पिपीलिकानां प्रार्थना ।

**द्वितीयः विभागः - पद्यम् ।**

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।**

पद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत । २




शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम् ।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ॥१॥
अतिथिर्बालकः पत्नी जननी जनकस्तथा ।
पञ्चैते गृहिणा पोष्या इतरे च स्वशक्तितः ॥२॥
समूलशाखान् पश्यामि निहतान् कायिनो द्रुमान् ।
युष्माभिरिह पूर्णाभिर्नद्यस्तत्र न वेतसम् ॥३॥
अकायश्चाल्पसारश्च वेतसः कूलजश्च वः ।
अवज्ञया वा नानीतः किं च वा तेन वः कृतम् ॥४॥

२. **शब्दज्ञानम् ।** १

पद्यांशात् पर्यायपदं चित्वा लिखत ।

i) वंशः - ............।

ii) वृक्षाः, पादपाः - ............।

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं, न वायसः
गजश्च सिंहस्य बलं न मूषकः ॥१॥
उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ॥२॥
अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्च स एव दोषः।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ॥३॥

१. **अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
किं न धारयेत् इति कविः वदति ?

२. **तात्पर्यलेखनम् ।** २
गुणी गुणं वेत्ति न वेत्ति निर्गुणः - अस्याः कल्पनायाः स्पष्टीकरणम् कुरुत ।

**प्र.२ क) स्मरणम् ।**
**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २
(i) धर्मार्थ० ....... जीवितस्य च ।।
(ii) यत्रोत्साह० ....... ध्रुवम् ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) साम्नैव यत्र सिद्धिर्न | श्रेयसो जीवितस्य च । |
| (ii) रोगास्तस्यापहर्तारः | यामयुग्मं न लङ्घयेत् । |
| (iii) नयविक्रमसंयोगः | यामयुग्माद्बलक्षयः । |
| (iv) याममध्ये रसोत्पत्तिः | तत्र दण्डो बुधेन विनियोज्यः। |
| | तत्र श्रीरचला ध्रुवम् । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | षष्ठी एकवचन | प्रथमा द्विवचन | तृतीया बहुवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(अन्यैः, नाम्नी, श्रेयसः, सर्वौ, धनवद्भिः, अस्य)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(शाम्यति, दद्याम्, करिष्यामः, अशक्नवम्, जानानि, उवाच)

**इ) समासाः । मेलनं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| (i) | न्यायाय प्रासादः | इतरेतर द्वन्द्व समास |
| (ii) | अधिकं मूल्यम् | अव्ययीभाव समास |
| (iii) | न आदरः | बहुव्रीहि समास |
| (iv) | धेनुः च पन्नगः च | कर्मधारय समास |
| (v) | स्थिता प्रज्ञा यस्य सः | चतुर्थी तत्पुरुष समास |
| (vi) | स्थानम् अनतिक्रम्य | नञ् तत्पुरुष समास |
| | | द्विगु समास |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ........ दूरं रुग्णालयम् अस्ति । (ग्रामस्य / ग्रामे / ग्रामात्)

(ii) स्वामी ....... कुप्यति । (भृत्यम् / भृत्याय / भृत्ये)

(iii) अलं ....... । (कोपम् / कोप / कोपेन)

(iv) ........ प्रति भरतः गच्छति । (अयोध्या / अयोध्यां / अयोध्ये)

(v) गुरुः ....... ज्ञानं वितरति । (शिष्यान् / शिष्यैः / शिष्येभ्यः)

(vi) जननी ........ स्निह्यति । (बालके / बालकम् / बालकाय)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) ........ = दयाघनः + त्वम् ।

(ii) पापान्मुक्तिः = ........ + मुक्तिः ।

(iii) मनस्यकरोत् = मनसि + ........ ।

(iv) तच्छ्रुत्वा = ....... + श्रुत्वा ।

(v) ........ = अद्य + अहम् ।

(vi) कस्मा अपि = ........ + अपि ।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) साधुः ........ उटजे निवसति स्म । (1)

(ii) पाण्डवेषु ........ अर्जुनः । (3rd)

(iii) ........ मित्रयोः न्यायशास्त्रं प्रियमासीत् । (2)

(iv) मार्गे ........ वाहनानि सन्ति । (5)

(v) मम मातामही दिनस्य ........ औषधं सेवते । (twice)

(vi) शाकुन्तलस्य ........ अङ्कः अतीव सुन्दरः अस्ति । (4th)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | | |
|---|---|---|---|
| १) | अहं | गुणवत्तां | कामये / कामयसे / कामयते । |
| २) | त्वं | वक्तुं | करोमि / करोषि / करोति । |
| ३) | सः | प्रशंसा | लभे / लभसे / लभते । |
| ४) | सा | प्रयत्नान् | न इच्छामि / न इच्छसि / न इच्छति । |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

महाराष्ट्रराज्ये रायगडः नाम सुविख्यातः दुर्गः। एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं गन्तुम् उत्सुका । किन्तु तस्याः शिशुः अद्यापि न सुप्तः। यदा दोलारूढः शिशुः सुप्तः तदा हिरकणी ............ प्रस्थिता । दुर्गे दुग्धविक्रयार्थं अधिकः कालक्षेपः अभवत् । सूर्ये अस्तमिते दुर्गद्वाराणि पिहितानि । आवृत्तं महाद्वारं ............ सा द्वारोद्घाटनाय रक्षापुरुषं प्रार्थयत परं सूर्योदयसमये एव द्वारम् उद्घाटनीयम् इति ............ आज्ञाम् अनुसृत्य सः तद् न उद्घाटितवान् । अस्वस्थचित्ता सा इतस्ततः अभ्रमत्। तस्याः नयनयोः पुरतः केवलं तस्याः शिशुः आसीत् । पुत्रस्नेहेन सा एकस्मात् ............ अवतरणं प्रारभत सुदूरम् उत्प्लुत्य भूमौ न्यपतत् गृहं च अगच्छत् ।

(तटात्, विलोक्य, दुर्गं, शिवभूपस्य)

**Best of Luck**